श्री ललिता पंचरत्नं

श्री ललिता पंचरत्नं

प्रातः स्मरामि ललितावदनारविंदं
बिंबाधरं पृथुलमौक्तिकशोभिनासं |
आकर्णदीर्घनयनं मणिकुंडलाढ्यं
मंदस्मितं मृगमदोज्ज्वलफालदेशं || 1 ||

प्रातर्भजामि ललिताभुजकल्पवल्लीं
रक्तांगुळीयलसदंगुळिपल्लवाढ्यां |
माणिक्यहेमवलयांगदशोभमानां
पुंड्रेक्षुचापकुसुमेषुसृणीर्दधानां || 2 ||

प्रातर्नमामि ललिताचरणारविंदं
भक्तेष्टदाननिरतं भवसिंधुपोतं |
पद्मासनादिसुरनायकपूजनीयं
पद्मांकुशध्वजसुदर्शनलांछनाढ्यं || 3 ||

प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यंतवेद्यविभवां करुणानवद्यां |
विश्वस्य सृष्टिविलयस्थितिहेतुभूतां
विद्येश्वरीं निगमवाङ्मनसातिदूरां || 4 ||

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति |
श्रीशांभवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति || 5 ||

यः श्लोकपंचकमिदं ललितांबिकायाः
सौभाग्यदं सुललितं पठति प्रभाते |
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनंतकीर्तिं || 6 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री ललिता पंचरत्नं |